No. १५६६

Title इन्द्रिय पदार्थ

Author ०

Extent १० Age १८८६

Subject न्याय शास्त्रं

इन्द्रियवादार्थः

१५६७

पत्रे १०

ई॰वाद
१

श्रीगणेशाय नमः यदागारसुता यदंघ्रितनया विद्याफलं तद्गता स्तुतिर्यशा सुतविद्याहितस्मरनिवारितान्तीक्ष
णां सुरासुरविमार्धितान्ततसरोजजालं हन्तं स्मरशासितुरस्य पदं नारायणस्यारिषु रोगं तु कं १ दुर्वादमत्त
द्विरदेन्द्रसंततेः पंचाननं पंचमुखस्य लोचनं शिष्यैर्महः संततसेवितं नोद्धिकं सोरंतमः शान्तिकरं भजाम्य
हं २ शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम् अस्ति
व शब्देतरोद्भूतविशेषगुणा ये रूपादयस्तदनाश्रयत्वे सति ज्ञानकारणीभूतो मनःसंयोगश्चक्षुरादिम
नःसंयोगस्तदाश्रयत्वं चक्षुरादावितिलक्षणसमन्वयः अत्रात्मन्यतिव्याप्तिवारणाय सत्यन्तं श्रोत्रे
व्याप्तिवारणाय उद्भूतेति तद्वारणाय चक्षुरादावुद्भूतेति उद्भूतत्वस्य न जातित्वम् शुक्लत्वादिना सांक राम १
र्यात् न च शुक्लत्वव्याप्यान्युद्भूतत्वानीति वाच्यं तेन रूपेण चाक्षुषादिजनकत्वानुपपत्तेः परं तु शु
क्लत्वादिव्याप्यानुद्भूतत्वं नाना तदभाववत्कूटश्चोद्भूतत्वं तस्य संयोगादिसाधारण्यान्नदादाया संभववा

रणाय विशेषेति वस्तुतस्तु उद्भूतत्वं गुणत्वसाक्षाद्व्याप्यजातिरेव न चोक्तदोषापत्तिः प्रमाणाभा
वेनानुद्भूतरूपानंगीकारात् न नु रूपादिसमवायिकारणतावच्छेदकपृथिवीत्वादिमत्वात् घ्राणादेः
नीरूपत्वापत्तेर्वा तत्र रूपस्वीकारस्यावश्यक इति चेन्न· तादृशनियमस्याजनितावयविकपालादौ रू
पसमवायिकारणतावच्छेदकावच्छिन्ने च जलपरमाण्वादौ व्यभिचरितत्वात् घ्राणादेर्नीरूपादेरिष्ट
त्वाच्च न च तत्पटतादौ दृश्यद्रव्यानोत्पत्तेस्तत्र रूपस्यावश्यकत्वात् तस्य पाकजत्वेनावयवरूपं विना
नुपपन्नमिति तदवयवे व्याप्तिरूपमुररीकरणीयं तस्य चोद्भूतत्वे घटान्तर्निविष्टावयवादावध्यक्षा
त्वापत्त्याऽनुद्भूतरूपसिद्धिरिति वाच्यं घ्राणादेरवयवेष्वनुद्भूतरूपादिना आरम्भादिष्वनुद्भूतरूपापत्ति
भियाऽनुद्भूतरूपादिवादिना उद्भूतरूपादिकं तस्मान्नोत्पद्यत इति शरणीकरणीयम् तथा च द
श्यदह्नोद्भूतरूपानुरोधेन तदवयवेऽनुद्भूतरूपकल्पनात् अनध्यक्षत्वं तु महत्त्वादितवाद्विवन
नुपपत्तेः तत्र च कश्चित्साक्षात्त्वक्षप्रयोजकं कश्चित्परंपरया चाक्षुषादौ च स्वविशिष्टरूपत्वादिना

इं. वाद
२
ग्रन्थ
2

अथ च रूपत्वादिकं वास्तां ओरणप्रयोजकं एवं च रूपत्ववद्रूढत्वस्यापि संयोगादावस्वीकारे बाध
काभावः अत एव वद्रूढत्वं प्रयोजकीभूतो धर्मः तदभावः अनुरूढत्वमिति तत्र तत्रोक्तं संगच्छते त
था च नत्समादाया संभव इति विशेषपदं व्यर्थमेव एवमिंद्रियेषु नक्षोष्णुरूढत्वविशेषज इति गुणपदमपि त
थेति सद्भिर्विभावनीयं तदाश्रयत्वमात्रोक्तौ स्यात्सद्रूपतो नेति आनाश्रयत्वमित्याश्रयभिन्नत्वं ननु त
दन्यतराभाववत्त्वं अतो न द्रव्यत्वादिमत्त्वमादाय चक्षुरादावव्याप्तिः अथ आनाश्रयत्वपदे नाश्रयभि
न्नत्वस्याश्रयत्वात् त्वंताभावस्य वाकथं लाभ इति चेदित्थं ॥ षष्ठे तरे रूढत्वविशेषणगुणाश्रयपदेन तत्कुणा
श्रयत्वाव हो ध्मते तादृशगुणपदोत्तरनञा विग्रहे हन्ति तद्भेदः प्रत्याय्यते तस्मान्निपातार्थत्वादन्यस्मिन्नभेदे
नान्वयः तद्भिन्नत्वप्रत्ययेन ततत्वमिति न च नञा तादृशार्थान्वये नञो मध्यनिवेशो संभवो समस्तपद — राम २
पूर्वनिपातस्यैव नञः साधुत्वादिति वाच्यं समस्तंधिकार्यकपदघटितपदसमुदायातिरिक्तस्थल एव तथा
नियमांगीकारात् इह तु समस्तं विधिकार्यबोधकान्यपदघटितत्वात् अत मध्यनिवेशस्यापि तस्य सं

भवात् अन्यथा घटानधिकरणसाध्याभाववद्वृत्तित्वमित्यत्रापि तत्स्य मध्यनिवेशो
न स्यादिति अथ पाषाणादौ पृथिवीत्वेन गंधानुमानात् तद्गतत्वगंधस्योद्भूतत्वे प्रत्यक्षाप
त्त्या अनुद्भूतगंधसिद्धिः न च तत्र पृथिवीत्वहेतुः स्वरूपासिद्ध इति वाच्यं काठिन्यादिना तत्
सिद्धेः यत्तु भस्मजनकत्वेन पाषाणादौ पृथिवीत्वसिद्धिरिति तन्नेत्युक्तं ध्वंसप्रतियोगिनोरेकत्र
जनकत्वासंभवात् न च प्रतियोगिना व्यापारावच्छिन्नत्वं कारणत्वं अन्यस्य व्यापारत्वावच्छि
न्नं कारणत्वं न विरुद्धमिति वाच्यं तथा सत्यनुभवध्वंसेनैवोद्बोधकसमवधानवशेन स्मरणा
पत्तौ संस्कारकल्पनाया नैरर्थक्यापत्तेः केचित्तु भस्मनः पाषाणध्वंसजन्यत्वात् पाषाणोपाद
नोपादेयत्वं सिद्ध्यति यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः अत्रोदृष्टांतः पट
लपटध्वंसजन्यखंडपटः एवं च भस्मनो गंधवत्वेन पृथिवीत्वसिद्धौ तदवयवानां पृथिवीत्वम्

दृं.या
२
3

नतत्समवायिकारणादृष्टत्वेन पाषाणे वा पृथिवीत्वसिद्धिमाहुः तदसत् उक्तव्या
ख्यो कथंचित्प्रथमदृष्टपदस्य प्रयोजनसंभवेपि द्वितीयदृष्टपदस्य व्यर्थत्वात् यत्तु दंड
प्रागभावध्वंसजन्ये घटे व्यभिचारात् प्राचां मते न मानां मिथ्याज्ञानध्वंसजन्येन काय
व्यूहे व्यभिचारात् न हारकत्वेन सार्थक्यं संभवतीति तन्मंदं मणिध्वंसजन्ये दहनादौ
व्यभिचारवारणाय ध्वंसत्वेन जनकस्यावश्यं विवक्षणीयतया दंडप्रागभावध्वंसात्म
कदंडस्य ध्वंसत्वावच्छिन्नजनकत्वाभावेन व्यभिचारात् कायव्यूहस्य मिथ्याज्ञानध्वंस
जन्यस्यैवासिद्धत्वात् न च नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति वचनात् कर्मणां राम
भोगं विना नाशाभावबोधनेन तत्त्वज्ञानानंतरं मिथ्याज्ञाननाशे पुण्यपापनाशं विना भो २
गानुपपत्त्या मिथ्याज्ञाननाशात् भोगसाधनीभूतकायव्यूहो जन्यत एवेति वाच्यम् मिथ्या

ते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावर इति द्विती
यमुंडकश्रुत्या ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुन इति भगवद्वचनानुरोधेन च ज्ञा
नानंतरं प्रारब्धकर्मणां भोगनाश्यत्वं तदितरकर्मणां भोगनाश्यत्वं वक्तव्यं एतज्जन्मनि
भोगजनकीभूतं कर्म प्रारब्धं कर्म तथा च प्रवृत्ते कायव्यूहधारणस्य जन्मांतरत्वेन तत्र भोग
जनकीभूतकर्मणां तत्त्वज्ञाननाश्यत्वेन तद्भोगस्यासंभवात्तदर्थं कायव्यूहस्य तत्त्वज्ञानानं
तरमसंभवात् किंच कायव्यूहस्य भोगार्थं स्वीकरणीयतया तद्भोगस्य सुखादिसाक्षात्कारस्व
रूपस्य मनसा सुखादिसंबंधं विना संभावितत्वेन तया शरीरव्यूहस्य च्छेदे नाणुरूपमनः संबंधस्य संभ
वेनैकदा तत्सुखाद्युपलब्धेरनुपपत्तेः क्रमेण साक्षात्कारांगीकारे रोगवत तदुत्पत्तेः एतन्म
ध्यिके नेति संक्षेपः न चनावतैव इष्टसिद्धिः संभवतीति वाच्यं लोहाभिहतपाषाणार्थं सज

इं॰ धा
४
5

न्येकृताशनेतस्याप्यपिव्यभिचारित्वात् नचलोकसिद्धतपाषाणध्वंसानंतरोत्पन्नसुरभि
वर्त्तिनःप्रतिबंधकीभूतदृढतरसंयोगनध्वंसजन्यैवपाषाणध्वंसजन्यत्वाभावान्नव्यभिचा
रइतिवाच्यं पाषाणसंयोगध्वंसजन्यस्यहेतुतापत्तेश्चेतिचेन्नसमंजसं एतस्यैविनिगमना
विरहेणउभयत्रहेतुतासिद्धेः तुल्ययुक्त्याभस्मनोपिपाषाणसंयोगध्वंसेनचारितार्थेतत्रापि
पाषाणध्वंसस्यहेतुतापत्तेश्चेतिचेत्समंजसं तथाप्युक्तयुक्त्याघ्राणादौतथागंधाभावेनतस्य
घ्राणाग्राह्यत्वेनपृथिवीत्वेतदगंधसाधकमितिनानुद्भूतगंधासिद्धेः गुणांतरस्यैवतथात्वसर्वत्रा राम
नुकत्वात् लक्षणाकल्पनायाःसर्वपदोपरपदयोस्तुल्यत्वात् तदाश्रयात्यंताभावस्यतुप्राश्र ४
यत्वांशेनतन्नाशसहविग्रहकरणात्इतिदिक् नचतदत्यंताभाववत्त्वार्थकत्वेऽसंभवइतिवाच्यं
ते
अणुसंयोगस्यवृत्त्यनियामकत्वेननित्यैकालिकायोगात् मननिभ्रवणेचसंयोगादिनाकस्या

प्यहणिन्वेतस्यलक्षणासंगतिः समवायेनचेद्विवक्षितंतदाघटादावतिव्याप्तिः तस्यासावय
वित्वात् नचात्मेज्ञानकारणमनःसंयोगाश्रयत्वस्यसमवायेनविवक्षणेनैवमितिवाच्यं तथा
प्यात्मन्यतिव्याप्तेर्दुष्परिहरणीयत्वात् यदिचाश्रयत्वंज्ञानासामानाधिकरण्यं विवक्षितंतदावस्य
मारणरीत्याचक्षुषत्वादृशगुणवत्त्वभाश्रयत्वेनतत्राव्याप्तेः सुषुप्तौज्ञानानुत्पत्त्यनुरोधेनचर्ममनः
संयोगस्यतत्कारणत्वांगीकारेणचर्मण्यतिव्याप्तेश्च ननुचर्मणःशरीरावयवत्वेनसमवायेनैव
तादृशोद्भूतविशेषगुणाश्रयशरीरत्वाव्याप्यस्यासत्त्वात्तदवच्छिन्नप्रतियोगिताकाभावासत्त्वान्नाव्या
प्तिरितिचेन्न चर्मणःशरीरावयवत्वेनतन्नाशेशरीरनाशापत्त्यासर्पादेश्चर्मनिस्सारणानंतरंतदि
दंशरीरमितिप्रत्यभिज्ञानुपपत्त्यातस्यनाशास्वीकारेणचर्मणोवयवत्वास्वीकारात् नचकंचुक
नाशानंतरंतच्छरीरस्यनाशेपिप्रत्यभिज्ञायाःसाजात्यावलंबकत्वात्तस्यावयवत्वमिष्टमेवेति

इं.वा
५
5

वाच्यं तथासति तुल्ययुक्त्या नखादीनामपि तदवयवत्वापत्त्या तन्नाशेपि शरीरनाशाप
त्तेः प्रत्यभिज्ञानस्य साज्ञात्मावलंबनस्य गृहीतेपि वक्तुं शक्यत्वात् किंच तस्यावयवत्वे त्वगिं
द्रियस्य सर्वावयवावच्छेदेन हानित्वस्वीकारात् नखकेशादीनां छेदनेपि दुःखापत्तेः अपि च
त्वचः शरीरावयवे हस्तांगुल्यादिकमादाय विनिर्गमनाविरहसंभवाच्च तस्यावयवत्वेपि संयुक्त
द्रव्यविशेषेण परंतु अंत्यावयवत्वेनैवेत्य[illegible]भ्युपगंतव्यं न चैतस्यांत्यावयवित्वे न्यूनाधिकभा
वो न स्यादिति वाच्यं शरीरहस्तादिवदवयवोपचयादिनोपपत्तेः एवं चात्राति काश्चिद्दुरूह
त्वेन स्वैव परिशीलितस्मृतेः अथैवमपि परमात्मनः परकीयेण मनसा प्रत्यक्षवारणस्याश
क्यत्वात् आत्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयात्ममनःसंयोगस्य तद्धेतुत्वमावश्यकम
तस्यैव ज्ञानसामान्यं प्रति हेतुत्वपरिकल्पनस्तु इषे ज्ञानोत्पत्तिवारणेन न चर्ममनःसंयोगस्य

राम
५

तद्धेतुत्वमिति नचात्मप्रत्यक्षावच्छिन्नंप्रति परात्मप्रत्याहृतविजातीयात्ममनःसंयो
गस्यहेतुत्वे ईश्वरस्यापरात्मत्वेन सहास्मदादिमनःसंयोगस्य परात्मप्रत्याहृतस्याभावेन तत्
प्रत्यक्षस्यासंभावितत्वया ईश्वरस्य प्रत्यक्षविषयत्वबोधकात्मावारेद्रष्टव्यः मनसैवानुद्र
ष्टव्यमित्यादिश्रुतेरपि अप्रामाण्यापत्तिरितिवाच्यं तादृशवेदस्यजीवप्रत्यक्षपरत्वात् नचै
वंजीवस्यसर्वदाप्रत्यक्षविषयत्वेनतस्यसर्वदामुक्तिःस्यादितिवाच्यं श्रवणादिप्रयोज्यप
रैः कृतात्मतत्वपरैः कृतात्मतत्वज्ञानस्यैवमोक्षहेतुत्वेनसर्वदातादृशप्रत्यक्षाभावेनमोक्षा
पत्तेरभावात् वेदस्यदृशिधातोरप्येतादृशप्रत्यक्षवाचकत्वात् यत्तु आत्मावारेश्रोतव्य
इत्यादिश्रुतौ आत्मपदंपरमात्मपरमेवेति तन्न परमात्मन अस्मदादिप्रत्यक्षविषयत्वेनस्म
सिद्धर्थप्रमाणांतरगवेषणायासवैफल्यापत्तेः अतएवात्मानात्मन्नप्रत्यक्षइति आत्मतत्व

दू॰या
६
6

विवेचने व्याख्यातं परमात्मपरतया मिश्रैः केचित्तु सुषुप्त्यनुरोधेन त्वङ्मनःसंयो
गस्य हेतुत्वं कल्पयन्ति इति वदन्ति तदपि न रम्यं त्वङ्मनःसंयोगस्य ज्ञानसामान्यं प्रति कारण
त्वे समवायेन ज्ञानसामान्यं प्रति स्वाश्रयेण त्वचा मनसा वा विजातीयत्वस्य नियामकसंयो
गेन हेतुतया गौरवापत्तेः चाक्षुषत्वाद्यादिसामग्रीमेलनदशायां चाक्षुषादिसामग्र्यास्त्वाच
प्रतिबन्धकत्वकल्पनं च मन्मते विजातीयमनःसंयोगस्य समवायः कारणतावच्छेदकः सं
बन्धः कल्प्यते चाक्षुषादिसामग्रीकाले त्वङ्मनःसंयोगाभावादेव न त्वाचापत्तिरिति न प्रति
बन्ध्यप्रतिबन्धकभावकल्पनं चेति लाघवमिति चेत्सत्यं सर्वांशे आत्मकस्य प्रतिनाडीम
नःसंयोगस्य हेतुत्वात्तदा अतिरापन्नात्मप्रतिव्याप्तिः न च स्वप्नस्य मानस्य विपर्य्य
यरूपस्य तन्नाड्यां वेतनगनार्थत्वात् न नाडीमनःसंयोगस्य न त्वाचकारणता अन्यथात्ममनःस्य

राम
८

दोषजन्यत्वासंभवइतिवाच्यं तत्रदोषकारणांतरसत्वात् ननाडीमनसंयोगस्यैवतत्रदो
षत्वांगीकारेणानियमस्यव्यभिचरितत्वात् नचेदमसिद्धं सर्वोपिभ्रमोधर्मिण्यभ्रांतःप्रका
रेतुविपर्य्ययइतिनियमात्इतिवाच्यं इहपल्वलेरंभाविहरतिचैत्रइतिसर्वानुभवसिद्ध
स्यमानसभ्रमस्यापलापयितुमशक्यत्वात् नियमघटकभ्रमपदस्यमानसमिथ्याज्ञानेतर
परतायाआवश्यकत्वात् एतेनात्मभिन्नविशेषणेनैवात्मन्यतिव्याप्तिवारणेसत्वेनस्पनि
रूपकत्वेतिपरास्तं प्रसक्तेतेनुनाआःशब्देतरतादृशगुणाश्रयभिन्नत्वाद्वारणासंभवात् अ
थैवमपिसंततमतमेनयनांतरस्यांगुल्यासंस्पर्शनेनयस्यचाक्षुषसंभवात् नचैतस्योद्भूत
रूपंविनानसंभवतीतितदंगीकारस्यावश्यकत्वात् चक्षुरितरोद्भूतविशेषगुणाश्रयत्वेनता
दृशाश्रयभिन्नत्वाभावात् इदंलक्षणंचाक्षुषभ्रममितिचेन्न नयनस्यांगुल्यासंयोजनेपरिदृ

इं. या
७
1

घघमानगोलकांगुलीसंयोगरूपव्यंजकसमवधानेप्यन्नप्रभायां चक्षुष्यभावात् अत
एवैतद्गोलकाद्बहिः परिदृश्यते अन्यथा चक्षुषो गोलकान्तर्गतसूक्ष्मतारा-प्रमाअदृशित्वेनत
त्रैव प्रत्यक्षापत्तिः नचादृष्टस्याक्षाणां दृष्टप्रभोत्पादनत्वेन संभवत्यन्यथा चक्षुरूष्मादिसंततौ क
दाचिदृश्यत्वप्रसंगादिति तत्र तेजोंशाभिभवे नेति वाच्यं अदृष्टस्यापि दृष्टोपादानत्वस्वीका
रात् नहि युक्तिबलादर्थसिद्धौ कस्यचिद्रूपकर्तुरज्ञादिजंभराणां विरोधमर्हतीत्यलमतिप्रसक्तवि
चारेण ननु श्रोत्रेणाऽंशाद्याकाशप्रतिमाशीवारयितुमुद्भूतरूपाश्रयत्वं स्पर्शगुणाश्रयत्वं वा देयं ए राम
वं च शब्देतरोत्पादानप्रत्युक्तलाघवमिति चेन्न एवमप्यात्मन्यतिव्याप्तेर्दुर्वारत्वात् आत्मभिन्नत्वे ७
तोत्स्यात् नमपि देयं एवं सत्युभयत्रापि तुल्यत्वात् प्रक्षपानादित्यन्यायेन तस्यैव सम्यक्त्वमिति यद्यप्युद्भूत
स्पर्शानाश्रयत्वात्मभिन्नत्वयोर्निवेशे भेदप्रतियोगिनां केषांचिदाश्रयतासंबंधेन समवायेन वा

वच्छिन्नभेदप्रतियोगितावच्छेदकतायाः समवायादिसंबंधेनावच्छेदकयोः स्पर्शत्वोद्भूतत्व
योश्च निवेशः शब्देतरत्वोद्भूतविशेषगुणाश्रयत्वयोर्निवेशेनोद्भूतस्पर्शाश्रयाश्रयाम
न्येषां चाश्रयत्वसंबंधेन समवायेन वा ऽवच्छिन्नप्रतियोगितावच्छेदकतायां समवाया
दिसंबंधेनावच्छेदकयोर्गुणत्वोद्भूतत्वयोर्गुणेतरस्य विशेषत्वस्य वाधिकस्य निवेशः
तु उद्भूतस्पर्शानाश्रयत्वनिवेशस्य वैलाघवमिति न तेन तौल्यं तथापि यथासन्निवेशेन वै
यर्थ्यमित्यवधेयं कालादावतिव्याप्तिवारणाय विशेष्यं तच्चैतां वारयितुं ज्ञानकारणे
ति तत्रैव रूपाभावप्रत्यक्षे कारणीभूतचक्षुःसंयोगाश्रये तां वारयितुं मनःपदमिति न मम
ते घ्राणं मनेतु इंद्रियावयवसंयोगस्यापि प्रत्यक्षजनकत्वात् इंद्रियावयवे वारयितुं म
नःपदं संयोगपदं च ज्ञानत्वादिप्रत्यक्षकारणसंबंधाश्रयज्ञानादौ वारयितुं अयसमवा

डे॰ धा
८
8

येनतत्संबंधवत्वं विचक्षणीयं कालादावतिव्याप्तिं वारयितुं तेनैवात्रापि कारणसंभवे सं-
योगपदमर्थमेवेति चेत्सत्यं मनसा समवायप्रत्यक्षे जननीये मनःसंयुक्तादिविशेषणतायाः
कारणत्वात् तद्विशेषणतायाः समवायरूपत्वेन तदाश्रयत्वे न तदाश्रयेति व्याप्तेर्वा एकपदं
सार्थकमिति अप्रामाणिकाश्चोपमानतार्किकाः संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वा-
त् समवायस्याप्रत्यक्षत्वेन किं तत्रातिव्याप्तेरिति तत्र मनोजं विज्ञानं संयोगप्रत्यक्षमेव त-
थानियमांगीकारेण समवायप्रत्यक्षासंभवात् अन्यथा रूपं घटे समवेतमिति प्रत्ययबाधा- राम ८
पत्तेः यद्वा समवायः प्रत्यक्ष एव न चोक्तनियमव्यभिचारः तादृशनियमस्य निर्युक्तिकत्वे-
नाग्राह्यत्वात् न चातीन्द्रियसंयोगप्रत्यक्षापत्तिः संबंधप्रत्यक्षस्यानुयोगिप्रतियोग्युभय-
विषयकस्यासिद्धत्वात्तेनैव वारणादिति यत्तु घ्राणावयवेषु मनसा घटीयरूपाभावप्रत्य-

सेजननीये कारणीभूतमनःसंयुक्तविशेषणताघटितसंयोगाश्रये त्वगवयवेतिव्या
प्तिवारणाय योग्यलक्षणेऽवयवान्यत्वं देयमिति तत्तुच्छं तदधिकरणकतदिंद्रियजन्यप्रयो
ज्यतदभावलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति तदधिकरणकतदापादकापत्तियोग्यतदिंद्रि
यजन्यानाहार्यतत्संसर्गकतत्प्रकारकोपलंभस्य विषयतासंबंधावच्छिन्नप्रतियोगिताकाभा
वरूपयोग्यानुपलब्धिहेतुत्वात् प्रकृते च मनोजन्यानाहार्यसमवायसंसर्गकघटीयरूपप्र
कारकोपलंभस्य स्वप्राप्तेंद्रियावयवाधिकरणघटीयरूपाव्यापकत्वात्तदापत्तिः जन्यत्वाप
त्तिविषयत्वासंभवेन तद्घटितयोग्यानुपलब्धेरभावात् ग्राह्ययोग्यमात्रप्रयोजकत्वं ग्र
गविशेषणमात्रेण द्रव्यसामान्याभावप्रत्यक्षवारणं गुरुत्वहेतुत्वं तन्नाभावप्रत्यक्षवारकत्वे
नविशेषणदलमर्थवत् तत्र मात्रपदं च घटीयरूपगुरुत्वान्यतरावच्छिन्नप्रतियोगिताक·

इ-वा.
८
१

घटाभावप्रत्यक्षवारकत्वेन घटाद्ययोरुद्भूतानुद्भूतरूपत्वावच्छिन्नप्रतियोगितावच्छेदकत्व
घटात्यंताभावप्रत्यक्षवारकत्वेनैव सार्थक्यसंभवेऽन्यतरावच्छिन्नावच्छेदकताकाभावप्र
त्यक्षवारकत्वेन सार्थक्योपवर्णनमयुक्तं तथापि अधिकरणधर्मावच्छिन्नप्रतियोगि
ताकाभावानंगीकारेण एकत्रोद्भूतानुद्भूतरूपयोरनंगीकारेण तदुभयप्रतियोगिताका
भावस्य विशेषणविशिष्टत्वाभावेन च तत्परित्यागः एवं च प्रकृते तद्दलस्यैवेति तस्य तत्र प्र
त्यक्षोपपत्तिरिति चेत्सत्यं एवं तादृशप्रतियोगिताकत्वस्य पृथिव्यत्वाभावेपि सत्त्वेन ज्ञा
नपरिमाणेन तत्प्रत्यक्षापत्तेः यदि च पृथिवीत्वाभावे प्रतियोगितावच्छेदकपृथिवीत्वत्व
स्यायोग्यसाधारणतया प्रयोजकाभावादिति विवक्षते तदा रूपत्वस्याप्ययोग्यसाधार
ण्येन तुल्यत्वात् यदि च घटीयरूपत्वस्य प्रतियोगितावच्छेदकत्वाद् घटस्य योग्यत्वेन न तौ

राम
८

इं-व्या
१०
10

ल्पमित्युच्यते तदा घटीयरूपत्वस्याननुगमात् तद्रूपावच्छिन्नप्रतियोगिताकाभावस्या
प्रसिद्धत्वात् न च क्षितित्वावच्छिन्नप्रतियोगिताकाभावस्यापि कालादौ सत्वेन मानसप्रत्यक्षे
बाधकाभावात् तत्कारणीभूतविशेषणताघटकसंयोगाश्रये काले ऽतिव्याप्तिस्तद्भिन्नत्वे
नापि विशेषणादानापत्तिः ऽगन्धपृथिवीपरमाणौ घटीयरूपाभावप्रत्यक्षापत्तिः इन्द्रि
यावयवेऽवयवान्तराभावेन प्राचांमते कालादावतिव्याप्तेः कालभिन्नत्वेन विशेषणेन
वारणे नवीनमते इन्द्रियमतेऽपि मनः पदवैयर्थ्यापत्तिश्च यदि च कार्याभावानुरोधात्का
लादौ रूपाभावेन मनःसन्निकर्षस्य योग्यस्वीकारेणान्तरं रूपाद्यभावमानसप्रत्यक्षमि
ति नातिव्याप्तिरित्युच्यते तदा घ्राणावयवनिष्ठघटीयरूपाभावेन मनःसन्निकर्षस्यायो
ग्यतास्वीकारे ऽयोग्यसन्निकर्षाभावेनातिव्याप्तलक्षणमिति तदनुरोधेन विशेषणदानानौचि

राम
१०

पत्र ९: